श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्ताशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्ताशीतितमः सर्गः ॥

## श्रीरामेण लक्ष्मणं प्रतीलोपाख्यानस्य कथनम्  - इलस्य मासावधिकस्त्रीत्वस्य मासावधिकपुरुषत्वस्य च प्राप्तिः

तच्छ्रुत्वा लक्ष्मणेनोक्तं वाक्यं वाक्यविशारदः।
प्रत्युवाच महातेजाः प्रहसन् राघवो वचः ॥ **7.87.1** ॥

एवमेव नरश्रेष्ठ यथा वदसि लक्ष्मण।
वृत्रघातमशेषेण वाजिमेधफलं च यत् ॥ **7.87.2** ॥

श्रूयते हि पुरा सौम्य कर्दमस्य प्रजापतेः।
पुत्रो बाह्लीश्वरः श्रीमानिलो नाम सुधार्मिकः ॥ **7.87.3** ॥

स राजा पृथिवीं सर्वां वशे कृत्वा महायशाः।
राज्यं चैव नरव्याघ्र पुत्रवत् पर्यपालयत् ॥ **7.87.4** ॥

सुरैश्च परमोदारैर्दैतेयैश्च महाधनैः।
नागराक्षसगन्धर्वैर्यक्षैश्च सुमहात्मभिः ॥ **7.87.5** ॥

पूज्यते नित्यशः सौम्य भयार्तै रघुनन्दन।
अबिभ्यंश्च त्रयो लोकाः सरोषस्य महात्मनः ॥ **7.87.6** ॥

स राजा तादृशोऽप्यासीद् धर्मे वीर्ये च निष्ठितः।
बुद्ध्या च परमोदारो बाह्लीकेशो महायशाः ॥ **7.87.7** ॥

स प्रचक्रे महाबाहुर्मृगयां रुचिरे वने।
चैत्रे मनोरमे मासे सभृत्यबलवाहनः॥ **7.87.8** ॥

प्रजघ्ने स नृपोऽरण्ये मृगाञ्शतसहस्रशः।
हत्वैव तृप्तिर्नाभूच्च राज्ञस्तस्य महात्मनः॥ **7.87.9** ॥

नानामृगाणामयुतं वध्यमानं महात्मना।
यत्र जातो महासेनस्तं देशमुपचक्रमे॥ **7.87.10** ॥

तस्मिन् प्रदेशे देवेशः शैलराजसुतां हरः।
रमयामास दुर्धर्षः सर्वैरनुचरैः सह॥ **7.87.11** ॥

कृत्वा स्त्रीरूपमात्मानमुमेशो गोपतिध्वजः।
देव्याः प्रियचिकीर्षुः संस्तस्मिन् पर्वतनिर्झरे॥ **7.87.12** ॥

यत्र यत्र वनोद्देशे सत्त्वाः पुरुषवादिनः।
वृक्षाः पुरुषनामानस्ते सर्वे स्त्रीजना भवन्॥ **7.87.13** ॥

यच्च किञ्चन तत् सर्वं नारीसंज्ञं बभूव ह।
एतस्मिन्नन्तरे राजा स इलः कर्दमात्मजः॥ **7.87.14** ॥

निघ्नन् मृगसहस्राणि तं देशमुपचक्रमे।
स दृष्ट्वा स्त्रीकृतं सर्वं सव्यालमृगपक्षिणम्॥ **7.87.15** ॥

आत्मानं स्त्रीकृतं चैव सानुगं रघुनन्दन।
तस्य दुःखं महच्चासीद् दृष्ट्वाऽऽत्मानं तथागतम्॥ **7.87.16** ॥

उमापतेश्च तत् कर्म ज्ञात्वा त्रासमुपागमत्।
ततो देवं महात्मानं शितिकण्ठं कपर्दिनम्॥ **7.87.17** ॥

जगाम शरणं राजा सभृत्यबलवाहनः।
ततः प्रहस्य वरदः सह देव्या महेश्वरः॥ **7.87.18** ॥

प्रजापतिसुतं वाक्यमुवाच वरदः स्वयम्।
उत्तिष्ठोत्तिष्ठ राजर्षे कार्दमेय महाबल॥ **7.87.19** ॥

पुरुषत्वमृते सौम्य वरं वरय सुव्रत।
ततः स राजा शोकार्तः प्रत्याख्यातो महात्मना॥ **7.87.20** ॥

स्त्रीभूतोऽसौ न जग्राह वरमन्यं सुरोत्तमात्।
ततः शोकेन महता शैलराजसुतां नृपः॥ **7.87.21** ॥

प्रणिपत्य उमां देवीं सर्वेणैवान्तरात्मना।
ईशे वराणां वरदे लोकानामसि भामिनी॥ **7.87.22** ॥

अमोघदर्शने देवि भज सौम्येन चक्षुषा।
हृद्गतं तस्य राजर्षेर्विज्ञाय हरसन्निधौ॥ **7.87.23** ॥

प्रत्युवाच शुभं वाक्यं देवी रुद्रस्य सम्मता।
अर्धस्य देवो वरदो वरार्धस्य तव ह्यहम्॥ **7.87.24** ॥

तस्मादर्धं गृहाण त्वं स्त्रीपुंसोर्यावदिच्छसि।
तदद्भुततरं श्रुत्वा देव्या वरमनुत्तमम्॥ **7.87.25** ॥

सम्प्रहृष्टमना भूत्वा राजा वाक्यमथाब्रवीत्।
यदि देवि प्रसन्ना मे रूपेणाप्रतिमा भुवि॥ **7.87.26** ॥

मासं स्त्रीत्वमुपासित्वा मासं स्यां पुरुषः पुनः।
ईप्सितं तस्य विज्ञाय देवी सुरुचिरानना॥ **7.87.27** ॥

प्रत्युवाच शुभं वाक्यमेवमेव भविष्यति।
राजन् पुरुषभूतस्त्वं स्त्रीभावं न स्मरिष्यसि॥ **7.87.28** ॥

**स्त्रीभूतश्च परं मासं न स्मरिष्यसि पौरुषम्।**
**एवं स राजा पुरुषो मासं भूत्वाथ कार्दमिः।**
**त्रैलोक्यसुन्दरी नारी मासमेकमिलाभवत्॥ 7.87.29॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्ताशीतितमः सर्गः॥